# Pratarnivedanakarikah

# प्रातर्निवेदनकारिकाः

## Document Information

Text title : prAtarnivedanakArikAH

File name : prAtarnivedanakArikAH.itx

Category : misc, upadesha

Location : doc_z_misc_general

Author : Vedantacharya

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor, NA

Description/comments : Ramanuja Sampradaya.

Latest update : June 12, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 15, 2024

*sanskritdocuments.org*

# प्रातर्निवेदनकारिकाः

श्रीमते रामानुजाय नमः ॥ श्रीगणेशाय नमः ॥

उत्थाय शयने तस्मिन्नासीनो नियतेन्द्रियः ।
त्रस्तनिर्विण्णहृदयो व्यर्थं वीक्ष्य गतं वयः ॥ १॥

तापत्रयेण चाक्रान्तस्तीव्रेणाध्यात्मिकादिना ।
दावजेनाग्निना लीढो भ्राम्यन्निव वने मृगः ॥ २॥

संसारवागुरान्तस्थो लूनपक्ष इवाण्डजः ।
अपश्यन्निर्गमोपायमागामिष्वपि जन्मसु ॥ ३॥

अकर्यैरतिबीभत्सैः क्रियमाणैः कृतैरपि ।
लज्जितश्च विषण्णश्च स्मर्यमाणैः स्वकर्मभिः ॥ ४॥

अविनीतमशिक्षार्हमसद्गुणगणाकरम् ।
अवधार्य स्वमात्मानमचिकित्स्याशुभाश्रयम् ॥ ५॥

दह्यमानेन्धनान्तस्थो विस्फुरन्निव कीटकः ।
अलब्धनिर्गमस्तिष्ठन्मध्ये मरणजन्मनोः ॥ ६॥

विह्वलश्च विषण्णश्च विमृगन्स्वामिमां दशाम् ।
चिन्तयेत्प्रथमं चैवमाचारप्रियमात्मनः ॥ ७॥

संसारचक्रमारोप्य बलिभिः कर्मरज्जुभिः ।
कालेनाकृष्यमाणस्य जङ्गमस्थावरात्मनः ॥ ८॥

अहो मे महती याता निष्फला जन्मसन्ततिः ।
अनाराधितगोविन्दचरणाम्भोरुहद्वया ॥ ९॥

अनास्वादितसत्कर्मज्ञानभक्तिसुधारसा ।
अदृष्टनन्तसंसारसागरोत्तारणप्लवा ॥ १०॥

श्रुतिस्मृत्युदिताशेषसदाचारपराङ्मुखी ।

त्यक्तवर्णसमाचारा भ्रष्टा वैदिकवर्त्मनः ॥ ११॥

अनुपासितसद्वृद्धास्वीकृतासत्समागमा ।
असम्पादितशुश्रूषा गुर्वाचार्यपितृष्वपि ॥ १२॥

निजकर्मजदेवादिदेहाध्यस्तात्मभावना ।
तद्भावनानुगोद्भूतसुखदुःखव्यवस्थितिः ॥ १३॥

असम्भूतस्वयाथात्म्यज्ञानजोत्तमनिर्वृतिः ।
पशुवत्प्राकृतैरेव गुणैरधिकनिर्वृता ॥ १४॥

न कर्मनिष्ठा नात्मज्ञा नापि भक्तियुता हरौ ।
नोद्युक्ता भक्तिहीनत्वात्तत्क्रियास्वर्चनादिषु ॥ १५॥

कर्मभिः पुण्यपापाख्यैरविद्यापरनामभिः ।
धूमैरिवार्चिरग्नेयं ज्ञानमावृत्य देहिनः ॥ १६॥

भूषयित्वा स्वकं देहं शब्दाद्यैः स्वार्जितैर्गुणैः ।
दर्शयित्वा स्वसौन्दर्यमात्मने तिष्ठमानया ॥ १७॥

निरस्तातिशयाह्लादसुखभावैकलक्षणम् ।
सञ्च्छाद्य स्वगुणैरेवं स्वरूपं परमात्मनः ॥ १८॥

गुणमय्या प्रकृत्याख्यभगवन्माययानया ।
स्वसँल्लीनानन्तजीवकृतकर्मानुरूपया ॥ १९॥

गुणत्रयाश्रयानन्तविचित्रपरिणामया ।
अतिदुस्तरयादेवप्रपत्तिरहितात्मभिः ॥ २०॥

प्रलोभ्यमाना सततं तयैवात्यन्तनिर्वृता ।
अजानतीव स्वहितं मूकस्वप्नानुकारिणी ॥ २१॥

निष्पानीये निरालम्बे निच्छाये निरुपाश्रये ।
द्राघीयस्यशुभे मार्गे यमस्य सदनं प्रति ॥ २२॥

गच्छतो मेऽसहायस्य वर्द्धयन्ती भयं महत् ।
अतीतापि सदैवैषा तिष्ठतीव पुरो मम ॥ २३॥

गतायास्त्वीदृशं रूपं वर्तमानेऽपि जन्मनि ।
तथैव सुमहान्कालोगतक्षण इवाल्पकः ॥ २४॥

अलब्धसुखसंस्पर्शमकृताघौघनिष्कृतिः ।
विनैव हरिपादार्चामहोपश्यत एव मे ॥ २५॥

किं करिष्यामि पदयोर्निपतिष्यामि कस्य वा ॥ २६॥

इत उर्ध्वमहं तावद्यावज्जीवं श्रियः श्रियः ।
पदयोरर्चनं कर्तुं यतमानः समाहितः ॥ २७॥

अभिगच्छन्हरिं प्राप्तः पश्चाद् द्रव्याणि चार्जयन् ।
अर्चयंश्च ततो देवं ततो मन्त्राञ्जपन्नपि ॥ २८॥

ध्यायन्नपि परं देवं कालेषूक्तेषु पञ्चसु ।
वर्तमानः सदा चैव पाञ्चकालिकवर्त्मना ॥ २९॥

स्वार्जितैर्गन्धपुष्पाद्यैः शुभैः शक्त्यनुरूपतः ।
आराधयन्हरिं भक्त्या गमयिष्यामि वासरान् ॥ ३०॥

इति वेदान्तचार्यविरचिताः प्रातर्निवेदनकारिकाः समाप्ताः ।

Encoded and proofread by Mohan Chettoor

*Pratarnivedanakarikah*

pdf was typeset on March 15, 2024

Please send corrections to *sanskrit@cheerful.com*